**||श्री स्वामी समर्थ ||**

---

**||श्री सिद्धि देवी अथर्वषिश |**

---

श्रीगणेशाय नमः ।

सिद्धेरथर्वशिर्षोपनिषत्तु परवेदके ।

परातां प्रथम वक्ष्ये सर्व सिद्धिं प्रदयिनिम

शान्ति पाठ

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।भद्रं पश्येमाक्षभिर्यजत्राः ॥

स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ॥

स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ तन्मामवतु तद् वक्तारमवतु अवतु माम् अवतु वक्तारम्

ॐ शांतिः । शांतिः ॥ शांतिः॥।

ॐ नमस्ते महालक्ष्म्यै ।

त्वमेव प्रत्यक्षं ब्रह्म भाव सिद्धिरसी ।

त्वं महासिद्धिः। त्वमेव मूलप्रकृतिः। त्वं गुणत्रय शान्तियुक्तासि।

त्वमेव केवलं महामयासि। त्वमेव केवलं महाविध्यासि।

त्वमेव केवलं तामस्यासी। त्वं साक्षात सिद्धिरसी ।

अणिमाधष्टसिद्धयस्त्वंत्रो जाताः।

त्वत्तो मुक्त्यादी चतुष्षष्टि सिद्ध्यो जाताः।
त्वं महासिद्धिर्ब्रह्म शक्तिः।
त्वधोगात्परंब्रह्मसिद्धिप्रदो भवति ।
त्वद्गुणेभ्यो जाता ब्रह्मविष्णुरुद्र शक्ति सूर्याः।
त्वतो जाता प्रकृतिरव्यक्तात्मिका ।
अव्यक्तान्महत । महतोहंकारः ।
अहंकाराद्गुणार्सूक्षमभूतानि च ।
भूतेभ्योः प्राण इन्द्रियाणि च ।
त्वं गुणत्रयातीतासि । त्वं देहत्रतयातितासि । त्वं कालत्रयातीतासि।
त्वं वस्थात्रयातितासि। त्वं देवत्रभतितासि । त्वं मूलाधार भुतोसि ।
त्वं शक्तित्रयात्मिका । त्वं योगीध्येयासि नित्यं। त्वं चित्तहर्षशोकासि ।
त्वं अष्टप्रकृतिः । त्वं पञ्चदेववरदासि ।
त्वं ब्रह्मा स्त्वं विष्णु स्त्वं रुद्र स्त्वं शक्ति स्त्वं बुद्धि स्त्वं लक्ष्मी स्त्वं वाणी स्त्वं ।
त्वं ब्रह्मभूर्भुवःस्वरोम् ।
ॐकार पूर्वमुच्चार्य श्रींकार तदनन्तरम ।
नमसिद्धयै ततः पक्ष्चात महा सिद्धे षडक्षरम ।
एतत् मनु स्वरूपं ।
ॐ श्रीं नमसिद्धयै ।
महादेवी च विद्महे महालक्ष्मिमक्ष्च धेमहि ।तन्नः सिद्धिः प्रचोदयात् ।
गणक ऋषिः।निचृद्गायत्रीच्छंदः ।
महा सिद्धिर्देवता।
ॐ बीजं ।
श्रीं शक्तिः ।

नमः कीलकं ।

श्रामित्यादी षडंगन्यासः।

ध्यानं

पितामम्बुज धारिणीं स्मितमुखीं' पिताम्बरालङ्कृतां ।
वामे लम्बकरां गणेशवनितां विघ्नेशवामे स्थितां ।
केशैरर्चित पादुकाम शशीधरां क्लहार माला धरां ।
चिन्तारत्नविभूषणम त्रिनयनां सिद्धिं परां भावये ।

हिरण्यवर्णां हरिणीं सुवर्णरजतसृजाम ।
चन्द्रां हिरण्यमयीम लक्ष्मीं महासिद्धिं नमाम्यहम।
हिरण्यं सुरभिं यस्यां विन्देयं पुरुषानहम ।
अनपगमिनिं तां त्वां महासिद्धिं नमाम्यहम ।
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीं महालक्ष्मीं महासिद्धिं नमाम्यहम ।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
अलक्ष्मी मे सर्वदा नाशयित्रिं तां त्वां सिद्धिं सर्वदा नौमि भक्त्याः ।
क्षुत्पि पासां मलाम भूतिम समृद्धिकम् ।
अलक्ष्मीर्निनुनादाम्यम्ब तव सिद्धे प्रसादतः
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां रमे ।
मुक्ताभां कमलां सिद्धिं गणेशाङंकनिवासिनीम ।
अणिमादीमहासिद्धिप्रदां सिद्धिं नमाम्यहम ।

हिरण्यवर्णां त्वां सिद्धिं गणेशाङ्कनिवासिनीम ।
अष्टैश्वर्य प्रदां लक्ष्मीं महालक्ष्मीं नमाम्यहम।
ब्रह्मभाव प्रदां सिद्धिं गणेशाङ्कनिवासिनीम ।
तथा संपत्प्रदां महालक्ष्मीं नमाम्यहम ।
अन्नदां भाग्यदां नित्यां धर्मदां कमदां सदा ।
धनदां पुत्रदां सिद्धिं महालक्ष्मीं नमाम्यहम ।
नमो लक्ष्म्यै महासिद्धयै महाभुत्यै महालक्ष्म्यै महामायायै महाशक्त्यै वल्लभायै कमलायै रमायै मंगलायै सिद्धयै कल्याण्यै सुन्दर्यै सिद्धलक्ष्म्यै नमो नमः ।

इदं अथर्वशीर्षं योऽधीते स महा सिद्धिम विन्दते ।
स सर्व संपदं लभते ।
स पञ्च अथर्वशीर्षं परायण फल मक्ष्नुते ।
स ब्रह्म भूयाय कल्पते ।
स कुबेर संपदं लभते ।
स स्वानंदभवनं गच्छती स्वानंदभवनं गच्छती ।
इत्युपनिषत् ।
इति श्री विनायक तंत्रे श्री सिद्धि अथर्वशीर्षं नाम दशमः पटलः

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥

||श्री स्वामी समर्थापर्ण मस्तु||